नागेशभट्टविरचिता

# परमलघुमञ्जूषा

पाठः १२ – ०३.०४.२०१७

स्फोटनिरूपणम्

sowmya.krishnapur@gmail.com
© vyoma-saṃskṛta-pāṭhaśālā – www.sanskritfromhome.in
www.vyomalabs.in

# मङ्गलम्

येनाक्षरसमाम्नायम् अधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम्॥

शिवं नत्वा हि नागेशेनानिन्द्या परमा लघुः।
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते॥

# पुनरावर्तनम्

- व्यञ्जनावृत्तिः
  - वक्त्रादिवैशिष्ट्यज्ञान-प्रतिभाद्युद्बुद्धः संस्कारविशेषः व्यञ्जना।
  - मुख्यार्थबाध-निरपेक्ष-बोधजनकत्वम्
  - मुख्यार्थ-सम्बन्ध-असम्बन्ध-साधारणम्
  - प्रसिद्ध-अप्रसिद्धार्थविषयकम्
- व्यञ्जना कुत्र? शब्द-अर्थ-पद-पदैकदेश-वर्णरचना-चेष्टादिषु सर्वत्र
- वक्त्रादिवैशिष्ट्यज्ञानं व्यङ्ग्यविशेषबोधे सहकारि।
- तार्किकमतेन लक्षणया व्यञ्जनायाः गतार्थत्वस्य निराकरणम्।

sowmya.krishnapur@gmail.com
© vyoma-saṃskṛta-pāṭhaśālā – www.sanskritfromhome.in

# सङ्क्षेपः

- शब्दस्य स्वरूपं किम्?
- वर्णाः प्रत्येकं वाचका इति चेत्, द्वितीयादिवर्णवैयर्थ्यापत्तिः।
- वर्णसङ्घातः वाचकम् इति चेत्
  - उच्चरितप्रध्वंसित्वेन युगपदसम्भवः
  - अप्रत्यक्षः
  - अयं पूर्वः अयं परः इत्यादिव्यवहारानुपपत्तिः

# सङ्क्षेपः

- अनित्याः शब्दाः इति तार्किकमतम्
  - उत्तरोत्तरवर्णे पूर्वपूर्ववर्णवत्त्वम् अव्यवहितोत्तरत्वसम्बन्धेन गृह्यते
    - नष्ट-विद्यमानयोरयं सम्बन्धः वक्तुमशक्यः
  - शब्दजशब्दन्यायः
    - अविद्यमाने आश्रयत्वाङ्गीकारः न शक्यते
  - पूर्वपूर्ववर्णानुभवजन्य-संस्कार-सध्रीचीन-चरमवर्णानुभवतः शाब्दबोधः
    - विपरीतसंस्कारोद्बोधेन अन्यार्थप्रत्ययापत्तिः

# सङ्क्षेपः

- चतुर्विधा वाग् – परा, पश्यन्ती, मध्यमा, वैखरी
- परा-पश्यन्ती – समाधौ ज्ञानविषयः
- मध्यमा – हृदिस्था, सूक्ष्मा, स्फोटव्यञ्जिका
- वैखरी – ध्वनिः, परश्रवणगोचरा
- शब्दः स्फोटात्मकः ब्रह्मरूपः नित्यः
- स्फोटः एकः अखण्डश्च, उपाधिभेदाद् शब्दभेदप्रतीतिः